# पुराणं पञ्चलक्षणम्

डा. धनञ्जयवासुदेवद्विवेदी
सहायकप्रोफेसरः, संस्कृतविभागस्य,
डा० श्यामा-प्रसाद-मुखर्जी-विश्वविद्यालयस्य,
राँचीस्थस्य, झारखण्डस्थस्य-834008

अस्ति सनातनसंस्कृतेः सर्वस्वं पुराणम्। इदं हि भव्यभारतीयसाहित्यस्याधारस्तम्भः, प्राचीनेतिहासमन्दिरसस्य कनककलश्च विद्यते। पुराणसाहित्यमनेकविधविज्ञानाम्बुधौ सन्तरतः पोतस्य प्रकाशप्रदीपः, मानवजातेरनादिकालात् सञ्चितविद्यानां सुदृढा मञ्जूषा च वर्तते। पुराणविद्या वस्तुतो वर्तमानेन भूतं स्वर्णश्रृङ्खलेख योजयते। पुराणं हि अस्माकं भारतीयानां सामाजिकराजनैतिकधार्मिकदार्शनिकसांस्कृतिक सम्पदामक्षय्यो निधिः। सरलया भाषया क्रमबद्धया कथाशैल्या च प्राचीनं सदपि नूतनायाः स्फूर्तेः सञ्चारणे किमपि वैशिष्ट्यं भजति पुराणमित्यत्र नास्ति सन्देहलेशप्रसङ्गः। भारतीयायाः संस्कृतेः सभ्यतायाश्च यथायथम् अवगमाय पुराणानां नितरां महत्त्वमस्ति। धार्मिकपरम्परयां वेदानन्तरं पुराणानामेव मान्यता वर्तते। पौराणिकज्ञानस्याभावे वैदिकसाहित्यस्यार्थावबोधः सर्वथा असम्भवो विद्यते। वेदेषु येषामाध्यात्मिकाधिदैविकाधिभौतिकबौद्धिकव्यावहारिकनैतिकसांस्कृतिकदेवमानुषजडचेतनात्मकानां विषयाणां सूक्ष्मरूपेण विधानं विद्यते, ब्राह्मणभागे, आरण्यके, स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, तेषां सर्वप्रकाराणां पुराणेषु आकर्षकबुद्धिगम्यमनोग्राह्योपदेशप्रदकथानकरूपेण वर्णनं कृतमस्ति। पुराणि विहाय न क्वचिदन्यत्र विपुलेऽपि वाङ्मये प्राचीनसंस्कृतेः सविस्तरं वर्णनम् उपलभ्यते। पुराणानि भारतीयसाहित्यस्य प्रेरणाभूतानि। यथा दिवसे प्रकाशो भगवता भास्करेण भवति, रात्रौ प्रकाशश्चन्द्रमसा जायते, गृहान्धकारो दीपेनापनीयते, तथैव परमात्मस्वरूपप्रदर्शनार्थं ज्ञानं तु पुराणवचनैरेव सम्भवितुमर्हति। पुराणं मानवजातेः हृदयान्धकारस्य अपकरणाय सर्वथा मणिमयं प्रकाशमस्ति। परमतत्त्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम्। पुराणे एव सर्ववेदार्थसारभूतं तत्त्वमिति नारदपुराणेऽपि स्पष्टमुक्तम्-सर्ववेदार्थसाराणि पुराणानिति भूपते। पुराणं पञ्चमो वेदः इति

भणितिः पुराणस्य पञ्चवेदतलचमङ्गीकरोति। छान्दोग्योपनिषदि विद्यासु पुराणेतिहासयोरुल्लेखः पञ्चमवेदरूपेण विद्यते-'इतिहासपुराणं पञ्चमं वेदम्'।

सर्वशास्त्राणां ज्ञातृत्वेऽपि पुराणज्ञानाभावात् कस्यापि पुरुषस्य विचक्षणत्वं न सम्भवतीति विष्णुपुराणस्यास्ति डिण्डिमघोषः-

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।

न चेत् पुराणं संविद्यान्नैव स स्याद् विचक्षणः।।

पद्मपुराणे तु प्रोक्तमस्ति यद् यैर्वेदास्तदितराणि च शास्त्राणि सम्यगधीतानि परन्तु तैर्यदि पुराणानामध्ययनं न कृतं चेत् तर्हि तेषामुत्तमज्ञानप्राप्तिर्न जायते-

बहुशास्त्रं समभ्यस्य बहून् वेदान् सविस्तरम्।

पुंसोऽश्रुतपुराणस्य न सम्यग् याति दर्शनम्।।

धार्मिकसन्देहानां निवृत्तये प्रवृत्तये चाध्यात्मिकपरलोकमार्गे पुराणानामनुशीलनं नितान्तमस्त्यावश्यकम्। पुराणानामन्तस्तलं प्रविश्य समीक्षायां क्रियमायां स्फुटमवगम्यते यत् पुराणेषु देशकालस्थित्यनुसारं सर्वानुकुलं कर्तव्यमुपदिष्टं वर्तते येन मानवानां सर्वथा कल्याणमेव जायेत।

पञ्चलक्षणं पुराणस्येदृशमनिवार्यद्योतकं स्वीकृतमासीद् यदमरसिंहेनापि कोशेऽस्य पदस्य प्रयोगः काञ्चन व्याख्यां विनैव कृतः। व्याख्यारहितस्य पारिभाषिकपदस्य प्रयोगस्तस्य सार्वभौमलोकप्रियतायाः संकेतक एव। पञ्चलक्षणमिति पदविषयेऽपि तथ्यमिदं सर्वतोभावेन मान्यमस्ति। वाराहपुराणे सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितानि पञ्चलक्षणे परिगणितानि सन्ति। सर्गः सृष्टिः, प्रतिसर्गः प्रलयः पुनः सृष्टिश्च। सृष्टेर्विभिन्नकलमनस्य द्योतकं मन्वन्तरम्, वंशः देवानामृषिणाञ्च वंशावलिः, वंशानुचरितं राजकुलानामितिहासः। उपर्युक्ताः पञ्चविषया एव पुराणेषु मुख्यतया वर्णिताः। तथ्यमिदमुरीकृत्य कोशकारोऽमरः पुराणस्यापरं नाम पञ्चलक्षणम् चकार। पुराणस्य पञ्चलक्षणता पुराणैरपि स्पष्टमेव स्वीक्रियते। तथा हि वायु पुराणे-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

विष्णुपुराणेऽपि किञ्चिच्छब्दपरिवर्तनपुरस्सरमिदमेव लक्षणमङ्गीकृतमस्ति। स्कन्दपुराणस्य सूतसंहितायाम् अपि वराहपुराणोक्तं पुराणलक्षणं शब्दतोऽर्थतश्च तथोक्तमस्ति। अन्येषु अपि अग्निमत्स्यादिपुराणेषु पञ्चलक्षणत्वमुपलभ्यते। पुराणस्य पञ्चलक्षणत्वं यथार्थतः पुराणानां प्रतिपाद्यविषयमाकल्य स्वीकृतम्। पुराणविषयपरिशीलनेनेदं प्रतीयते यन्मुख्यतया सर्वेषु पुराणेषु इमे एव पञ्चविषया विस्तरेणोपन्यस्ताः सन्ति।

अस्य लक्षणस्य अभिप्रायः- इयं सृष्टिः कथं कस्मादभूत? अस्याः प्रलयः कस्मिन् केन प्रकारेण भविता? सृष्टेः पदार्थानामुत्पत्तिक्रमः कीदृशः, मानवजातेः प्रमुखर्षीणां राज्ञाञ्च चरितं कीदृशम्? सृष्टिःप्रलयोर्मध्ये कियान्कालो व्यतीतो भवति? इति पञ्चविषयाणां विवेचना येन भवति तदेव पुराणम् उच्यते। एतत्पञ्चलक्षणलक्षितं पुराणमभिधीयते। प्रायः सर्वेषु पुराणेषु अस्य लक्षणस्य न्यूनाधिक्यरूपेण समावेशो वर्तते, एषां पञ्चानां विषयाणां मध्ये कस्मिश्चित्पुराणे कस्यचिदेकस्याधिक्येन वर्णनं विद्यते,कस्यचिच्च संक्षेपतो वर्णनं दृश्यते, कुत्रचिच्च कस्यचनैकस्य विषयस्य सातिशयवर्णनमुपलभ्यते।

पुराणस्य सर्वमान्यपरम्परामनुसृत्य सर्गादिपञ्चलक्षणान्येवं विविच्यन्ते-

**सर्गः-**

साम्यावस्थापन्नस्य त्रिगुणात्मकस्य प्रधानतत्त्वस्य गुणेषु क्षोभान्महत्तत्त्वं ततोऽहंकारो जायते, तत एकादशेन्द्रिय-पञ्चतन्मात्रा-पञ्चमहाभूतानां सम्भवः सर्गो निगद्यते। श्रीमद्भागवते तृतीयस्कन्धस्य दशमेऽध्याये मुख्यरूपेण त्रिविधः सर्गः प्रोक्तोऽस्ति-प्राकृतसर्गः, वैकृतसर्गः उभयात्मकसर्गश्च। तत्र प्रकृत्या स्वभावेनोत्पन्नः सर्गः प्राकृतसर्गः प्रोच्यते। विकृत्या समष्टिस्वरूपात्मकब्रह्मण उत्पद्यमानः सर्गो वैकृतसर्गः प्रोच्यते। यश्च द्वाभ्यां प्रकृतिविकृतिभ्यामुत्पद्यते स उभयात्मकः सर्गो निगद्यते। तत्र प्राकृतः सर्गः षड्विधो भवति, वैकृतः सर्गः त्रिविधो जायते, उभयात्मकश्च सर्गः एकविध एव भवति। एवं सङ्कलनया सर्गो दशप्रकारको भवति। प्रथमः सर्गो महत्तत्त्वस्यास्ति यः सृष्ट्यादौ भगवतः प्रेरणया प्रकृतिस्थेषु सत्त्वादिगुणेषु क्षोभाद् विषमतया उत्पद्यते। द्वितीयः सर्गः अहङ्कारस्यास्ति, यतः पृथिव्यादीनां पञ्चमहाभूतानामिन्द्रियाणाञ्चोत्पत्तिर्भवति। तृतीयः सर्गः भूतसर्गोऽस्ति, यत्र पञ्चमहाभूतोत्पादकः सूक्ष्मभूतः तन्मात्रासर्गः समागच्छति। चतुर्थः सर्गः इन्द्रियाणामस्ति यानि ज्ञानकर्मसाधकानि सन्ति। पञ्चमः सर्गः सात्त्विकाहङ्कारादुत्पन्नानामिन्द्रियाधिष्ठातृणां देवानामस्ति। षष्ठः

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

सर्गः पञ्चपर्वाविद्याया अस्ति, यत्र तामिस्र-अन्धतामिस्रतमोमोहमहामोहाख्या पञ्चग्रन्थयः सन्ति, या जीवानां बुद्धेरावरणविक्षेपकारिकाः सन्ति। सप्तमः सर्गः षड्विधकारकाणां स्थावराणां वनस्पति-ओषधि-लता-त्वक्सार-विरुध्-द्रुमाणामस्ति।अष्टमः सर्गः तिर्यग्योनीनां (पशुपक्षिकीटपतङ्गानाम्) अस्ति। नवमः सर्गः एकविध एव मनुष्याणामस्ति येषामाहारप्रवाह उपरिष्टाधः भवति। एतदतिरिक्ता चतुर्णां सनक-सनन्दन-सनातन-सनत्कुमाराणां सर्गः दशमो कौमारसर्गनाम्ना प्रसिद्धोऽस्ति, यः प्राकृतवैकृतोभयात्मकोऽस्ति।

**प्रतिसर्गः-**

भागवतानुसारं प्रतिसर्गलक्षणमस्ति-

पुरुषानुगृहीतानामेतेषां वासनामयः।

विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम्।।

प्रायः प्रत्येकपुराणेषु प्रतिसर्गस्य विवेचनं विद्यते।इदं सकलं चराचरात्मकं जगत् स्ववासनामयैः संस्कारैः पुनः पुनः सृष्टिरचनायां जनिम् उत्पद्यते। यथा वर्षर्तौ पृथिव्यामज्ञातरूपेण स्थितानि बीजानि बहुविधलतागुल्मतृणादिरूपेण स्वयं प्रादुर्भवन्ति, तथैव वर्तमानसृष्टेः पूर्वसृष्टौ समुत्पन्नानां जीवानामवशिष्टवासनामयैः संस्कारैः पुनः सृष्टिरचना समये अनेके पदार्थाः तद्भोक्तारो जीवाश्च समुत्पद्यन्ते। य उत्पद्यते तस्याऽवश्यमन्तो भवतीति नियमानुसारं सृष्टेः अनन्तरं जगतः प्रलयावस्थाऽपि समागच्छति। तथा च वर्तमानायाः सृष्टेः कदा प्रलयो भविष्यतीति प्रश्नस्योत्तरं पुराणेषु महत्या वैज्ञानिकपद्धत्या प्रदत्तमस्ति। पुराणानुसारं प्रलयस्य चत्वारो भेदा भवन्ति-नैमित्तिकप्रलयः, प्राकृतिकप्रलयः, नित्यप्रलयः आत्यन्तिकप्रलयश्च। ब्रह्मणो दिवसावसाने तावत्कालपर्यन्तं नैमित्तिकः प्रलयो भवति। अयमेव ब्रह्मणो रात्रिरभिधीयते, यत्र चतुर्दशभववो भवन्ति। ब्रह्मणो द्विपरार्द्धस्यायुषः समाप्तौ सप्तप्रकृतयः (महत्, अहङ्कारः, पञ्चतन्मात्राश्च) स्वकारणेऽव्यक्ते प्रकृतौ संप्रलीयन्ते। अतोऽयं प्राकृत्तिकः प्रलयः कथ्यते। आत्यन्तिकस्य प्रलयस्य कश्चन कालो निश्चितो नास्ति। स तत्कालेऽपि सम्भवितुमर्हति, कोटिवर्षपर्यन्तमपि न सम्भवति, अपितु अस्य साधनसामग्री यदैवोपतिष्ठते तदैवायं जायते। वस्तुतः आत्यन्तिकप्रलयः आत्यन्तिकदुःखनिवृतेरेव नामान्तरमस्ति। प्रतीक्षमनूभूयमानोऽयं

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

विनाशः प्रतिदिनं निद्रासमये समस्तभावपदार्थस्याभावानुभवो वा नित्यप्रलयनाम्ना व्यवह्रियते। तथा हि कूर्मपुराणम्-

योऽयं संदृश्यते नित्यं लोके भूतक्षयस्त्विह।

नित्यः सङ्कीर्त्यते नाम मुनिभिः प्रतिसञ्चरः।।

**वंशः-**

ब्रह्मणः सकाशादुत्पन्नानां नृपतीनाम् ऋषीणाञ्च भूतभविष्यवर्तमानकुलपरम्परा वंशः कथ्यते। तथा चोक्तं श्रीमद्भागवते-

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः।

पुराणानि हि हिन्दूजातेरितिहासस्य मूलस्रोतांसि सन्ति। यद्यपि रामायणे महाभारते च प्रधानतया इतिहासस्यैव वर्णनं विद्यते तथापि पुराणेष्वपीतिहासस्य विवेचनं सर्वोपकारमतिसुगमतया कृतमस्तीति बहवः समालोचकाः सोल्लासं समर्थयन्ति। यत्रान्यासां जातीनां वंशस्येतिहासो न संतोषजनक उपलभ्यते तत्र हिन्दूजातेरितिहासस्य वर्णनमादिकालादेव व्यवस्थितं मिलति। हिन्दूजातौ सूर्यवंशाचन्द्रवंशभृगुवंशगौतमवंशकश्यपवंशादयोऽनेके वंशाः वर्तन्ते। सृष्टेरारम्भत एवैतेषां वास्तविकी सुव्यवस्थितवंशपरम्परा पुराणेष्वेव विद्यते।वास्तविकस्येतिहासस्य ज्ञानाय गौरवाय समुन्नतये च पुराणानि अत्यादरणीयानि। सृष्टिकालाद् आरभ्य प्रलयपर्यन्तं क्रमबद्धं वंशवर्णनं सुगमं कार्यं नास्ति। यदि एकैकं कृत्वा वर्णयेत् तदा कार्यमिदं सम्पन्नं न स्यात्। अतः पुराणेषु वंशावली कुत्रचित् क्रमशः लिखिताऽस्ति, क्वचन् च साधारणान् पुरुषानगणयित्वा प्रमुखाणामेव पुरुषाणामुल्लेखोविद्यते। कुत्रापि तु तेषामेव महापुरुषाणामुल्लेखोऽस्ति येषां धार्मिकेण जगता महत्त्वशालिना च केनचित् कार्येण सह सम्बन्धोऽस्ति।

**मन्वन्तरम्-**

मन्वन्तरं नाम दैवराज्ये नानापरिवर्तनकारकः कालविशेषः। श्रीमद्भागवते मनोः मनुपुत्राणां देवानामिमन्द्रस्य ऋषीणाम् अंशावताराणाञ्च घटनाया उल्लेख इति षड्विधं मन्वन्तरं प्रोक्तमस्ति-

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।

ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।।



E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

यदि मन्वन्तरज्ञानं न स्यात्तर्हि हिन्दूनामितिहासे महती अव्यवस्था समुपतिष्ठेत। स्वायम्भुमनोः समये के ऋषयः के च राजान आसन्, क इन्द्रः कश्च विष्णोरवतारो जातः? स्वरोचिषस्य मनोः के के सहायका आसन्? उत्तमस्य मनोः समये कस्य पुराणस्य प्राधान्यमासीत् रैवतमनुकाले कीदृशी व्यवस्था आसीदित्यादिप्रश्नानां यथार्थमुत्तरं पुराणैर्विना कोऽपि दातुं शक्नुयात्। मन्वन्तरज्ञानमन्तरा कस्यापि ऋषेः राज्ञो वा कालस्य कथं यथार्थं ज्ञानं भविष्यति? एकस्मिन् कल्पे 14 मनवो भवन्ति केन मनुना का स्मृतिः रचिता, तस्य स्त्रियाः किन्नामासीत् कियन्तश्चासन् तस्य तनयाः? इत्यादि ज्ञानं मन्वन्तरं विना भवितुमर्हति। कस्य प्रादुर्भावः कदाऽजायतेत्यादि रहस्यं ज्ञातुं भगवता व्यासेन महर्षिणा मन्वन्तरपद्धतेराविष्कारः कृतः। पुराणेषु या गाथा यानि चरित्राणि याश्च ऐतिहासिकघटना वर्णयन्ते तासां सर्वासां स्वरूपं समाधियोगेन समाधिगम्यत्रिकालदर्शी महर्षिः व्यासो लोककल्याणाय वर्णितवान्। पुराणेषु प्रतिपादिता देवपदाधिकारिणां देवानां च गाथा सृष्टिसम्बन्धेनास्माकं परमोपयोगिनी वर्तते। प्रतिमन्वन्तरं मनुरिन्द्रः ऋषयः देवता राजानश्च परिवर्तन्ते तथा तेषां स्थानेषु नवा नवा अधिकारिण उपविशन्ति। तथा चोक्तम्-

सप्तर्षयः सुराः शक्रो मनुस्तत्सुनवो नृपाः।
एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत्।।

मनुः सप्तर्षयः देवाः पितरश्चेति चत्वारः प्रतिमन्वन्तरस्य मूलानि अभिमतानि सन्ति। एतदतिरिक्ता याः प्रजाः सन्ति ता एषामन्तर्भूता भवन्ति। देवा ऋषीणां पुत्राः सन्ति पितरो देवानां पुत्राः सन्ति, ऋषयश्च देवपुत्राः सन्ति। एवं सप्तर्षिभ्यो ब्राह्मणानां मनोः क्षत्रियवैश्यशूद्रादीनामुत्पत्तिरस्तीतीदमेव मन्वन्तरस्यास्ति संक्षिप्तं विवरणम्-

सप्तर्षयो मनुर्देवा पितरश्च चतुष्टयम्।
मूलं मन्वन्तरस्यैते तेषाञ्चैवान्तरे प्रजाः।।
ऋषीणां देवताः पुत्राः पितरो देवसूनवः।
ऋषयो देवपुत्राश्च इति शास्त्रविनिर्णयः।।

**वंशानुचरितम्-**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

मन्वादिवंशेषु समुत्पन्नानां विशिष्टानां महापुरुषाणां रुचिरचरित्रवर्णनं वंशानुचरितमुच्यते। अत्र मर्त्यलोकप्रभवाणां पुण्यकर्मशालिनामृषीणां धर्मरक्षणतत्पराणां राज्ञां च वंशजा वर्ण्यन्ते, सृष्टिश्रृङ्खलायाः सदाचारादिविभागानाञ्च विस्तृतं वृत्तान्तमुपलभ्यते-

वंशानुचरितं तेषां वृत्तं वंशधराश्च ये

पुराणानुसारमेव वंशानुचरितस्य ज्ञानं सम्यकगभवितुमर्हति। यदि जगति पुराणानि न स्युस्तर्हि कथमिदं ज्ञातुं शक्यते यद् महाराजो युधिष्ठिरो हरिश्चन्द्रो वा महान् सत्यवादी आसीत्, राजा जनको विशिष्टो ब्रह्मज्ञानी बभूव, राजा दिलीपश्चातिगोभक्तो जातः, अर्जुनोऽद्वितीयो धनुर्धरोऽभवत्, ध्रुवप्रह्लादादयो बालका अपि परमभगवद्भक्ता वभूवुः। यदि पुराणेषु वंशानुचरितं न श्रूयेत्, तर्हि हिन्दूजातेः समस्तं गौरवं आदर्शश्च विलुप्येत संस्कृतिसदाचारास्तिकतावीरताब्रह्मचर्यपातिव्रत्यभगवद्भक्तिज्ञानकर्मणां समुज्ज्वल उपदेशश्च कथङ्कारं प्राप्येत?

राजनीतिशास्त्रे 'पुराणं पञ्चलक्षण' इत्यस्य एको नूतन एव सङ्केत उपलभ्यते यः पूर्वनिर्दिष्टलक्षाद्भिन्नः। कौटिल्यशास्त्रस्य व्याख्यायां जयमङ्गलया कस्मादपि प्राचीनग्रन्थादयं श्लोक उद्धृतः-

सृष्टिप्रवृत्तिसंहारधर्ममोक्षप्रयोजनम्।
ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम्।।

अत्र पञ्चलक्षणपदस्य नव्या व्याख्या यस्यां धर्मः पुराणस्यापरिहार्यं लक्षणम्। मूलतः पुराणेषु धार्मिकविषयाणां समावेशोऽभीष्ट आसीत्।

श्रीमद्भागवते पुराणे दशलक्षणमपि उक्तम्। तथा हि

सर्गश्चाथ विसर्गश्च वृत्ती रक्षान्तराणि च।
वंशो वंशानुचरितं संख्या हेतुरपाश्रयः।।

वस्तुतः एतानि दशलक्षणान्यपि पञ्चलक्षणस्यैव विस्तारः वर्तते। एषु दशसु लक्षणेषु नास्ति किमपि नूतनतत्त्वं यत् पञ्चलक्षणैर्नावगम्यते। भागवतस्य दशमे स्कन्धे सर्गप्रतिसर्गवंशवंशानुचरतिमन्वन्तराणि एभिरेव शब्दैर्निरूपितानि सन्ति।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

एवं पुराणेषु सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितवर्णनद्वारा भारतीयप्राचीनपरम्पराया विवरणस्य सम्यक् संकलनं कृतमस्ति।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi